[1]करिष्यावः। करिष्यामः (७.३.१०१/२१७०)। कुण्डानि। पुनः प्रत्ययग्रहणं [2]किमर्थम्? [3]लुप्तप्रत्यये मा भूत्। [4]श्र्यर्थम्। [5]भ्र्वर्थम् (म. भा. १.३१७)। अङ्गप्रदेशाः – 'अङ्गस्य' (६.४.१/२००) इत्येवमादयः ॥

## सुप्तिङन्तं पदम्। (१४/२९)

सुप् तिङ इति प्रत्याहारग्रहणम्। सुबन्तं तिङन्तं च [6]शब्दरूपं [7]पदसञ्ज्ञं भवति। ब्राह्मणाः [8]पठन्ति। पदसञ्ज्ञायामन्त[9]ग्रहणमन्यत्र सञ्ज्ञाविधौ प्रत्ययग्रहणे [10]तदन्तविधेः प्रतिषेधार्थम् (म. भा. १.३१८)। [11]गौरी ब्राह्मणितरा। पदप्रदेशाः – 'पदस्य' (८.१.१६/४०१), '[12]पदात्' (८.१.१७/४०२) इत्येवमादयः ॥

## नः क्ये। (१५/२६५९)

क्ये इति क्यच्–क्यङ–[13]क्यषां सामान्यग्रहणम्। नान्तं शब्दरूपं क्ये परतः पदसञ्ज्ञं भवति। क्यच्–राजीयति। क्यङ–राजायते। क्यष्–चर्मायति, चर्मायते (८.२.७/२३६)[14]। 'सिद्धे सत्यारम्भो नियमार्थः' (का. प. ५९)। नान्तमेव[15] क्ये परतः [16]पदसञ्ज्ञं भवति, नान्यत्। वाच्यति। स्रुच्यति (म.भा.१.३१९) ॥

## सिति च। (१६/१२५२)

'यचि भम्' (१.४.१८/२३१) इति वक्ष्यति। तस्यायं पुरस्ताद्[17]अपवादः। सिति प्रत्यये परतः पूर्वं पदसञ्ज्ञं भवति। 'भवतष्ठक्छसौ' (४.२.११५/१३३९)–[18]भवदीयः (८.२.३९/८४)। 'ऊर्णाया युस्' (५.२.१२३/१९२९)–[19]ऊर्णायुः। 'ऋतोरण्' (५.१.१०५/१७६९)[20], 'छन्दसि घस्' (५.१.१०६/३४९५)–ऋत्वियः ॥

## स्वादिष्वसर्वनामस्थाने। (१७/२३०)

स्वादिषु इति [21]सुशब्दादेकवचनात् (४.१.२/१८३) आरभ्य आ कपः (५.४.१५१/८८९) प्रत्यया गृह्यन्ते। स्वादिषु प्रत्ययेषु परतः [22]सर्वनामस्थानवर्जितेषु पूर्वं पदसञ्ज्ञं भवति। राजभ्याम्। राजभिः। राजत्वम्। (६.४.१४२/३११) [23]राजता। राजतरः। [24]राजतमः। असर्वनामस्थाने इति किम्? [25]राजानौ। राजानः ॥

## यचि भम्। (१८/२३१)

स्वादिष्वसर्वनामस्थाने [26]इति वर्तते। पूर्वेण पदसञ्ज्ञायां प्राप्तायां तदपवादो भसञ्ज्ञा विधीयते। यकारादावजादौ च स्वादौ [27]सर्वनामस्थानवर्जिते [28]प्रत्यये परतः पूर्वं भसञ्ज्ञं भवति। यकारादौ––गार्ग्यः। वात्स्यः। अजादौ–दाक्षिः। [29]प्लाक्षिः (६.४.१४८/३११)।

---

1. करिष्यावः नास्ति अ.फ.ह, करिष्यामः नास्ति फ. 2. किम् फ. ह. 3. लुप्ते प्रत्यये ब. क. ड. ई, नास्ति अ.फ.ह. 4. स्त्रचर्थम् अ.क. 5. भ्वर्थम् क.ग.फ. 6. यत् इत्यधिकम् ह. 7. तत् इत्यधिकम् फ. ह. 8. पचन्ति अ.ड.ह. 9. अन्तवचनम् फ. 10. तदन्तविधिप्रतिषेधार्थम् फ. ह. 11. गौरी ब्राह्मणितमा फ, गौरीतरा, ब्रह्मबन्धुतरा ह. 12. सूत्रमिदं नास्ति फ.ह. 13. क्यष्सामान्यग्रहणम् ब, सामान्येन ग्रहणम् क. फ. ह. 14. वर्मायति वर्मायते क.न्या. 15. शब्दरूपं इत्यधिकम् फ. 16. पदसंज्ञा ह. 17. अपकर्षः अ.ब.क.फ.ह.ई. 18. भवदीयम् ड. 19. नास्ति ह. 20. आर्तवम् इत्यधिकम् क. 21. सुपाशब्दात् ब. 22. सर्वनामस्थान-वर्जितेषु नास्ति ह. 23. नास्ति फ. 24. राजतनुः ब. 25. राजा इत्यधिकम् फ.ह. 26. इत्येव ह. 27. असर्वनामस्थाने अ.फ. 28. ङिति प्रत्यये क, प्रत्यये नास्ति फ.ह. 29. नास्ति फ.ह.